# संस्कृतवार्ता:

दिनाङ्क : 05/03/2025 सायम् - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

आदौ मुख्यवार्ताः

- प्रधानमन्त्रिणा श्रीनरेन्द्रमोदिना जीविकोत्पादन-विषये बजट इति वित्त-सङ्कल्पनाया: पश्चात् वेबिनार इति आभासीयमुपवेशनं सम्बोधितम्, प्रोदितं च यत् सर्वकारेण जनानाम्, अर्थव्यवस्थाया:, नवाचाराणाम् आधारिक-संरचनानां निवेशस्य च कृते समान-रूपेण प्रदत्तास्ति प्राथमिकता।
- सर्वकारेण लैङ्गिक-संवेदनशील-शासन-पद्धतिं सुनिश्चेतुम् आदर्श-महिला-अनुकूल-ग्राम-पंचायतानां कृत: प्रारम्भः।
- रेल-विभागेन फरवरी-पञ्चदश्यां नव-दिल्ली-रेल-स्थासने दुरापन्नाया: ससम्भ्रम-पलायन-दुर्घटनाया: अनन्तरं पञ्च वरिष्ठाधिकारिण: स्थानान्तरिता:।
- झारखण्डस्य पश्चिमीय-सिंहभूम-जनपदे आई.ई.डी. इति विस्फोटे सी.आर.पी.एफ. बलस्य भटत्रयं व्रणीभूतम्।
- अमेरिकीयेन राष्ट्रपतिना डोनाल्ड ट्रम्पेण प्रोच्यते यत् तेन प्रवर्तितं टैरिफाख्यं पारस्परिकं शुल्कं अप्रैल-द्वितीया-त: क्रियान्वयिष्यते।
- लाहौरे चैंपियंस ट्रॉफीति क्रिकेट् स्पर्धा-शृङ्खलाया: प्रागुपान्त्यचक्रीये द्वितीये द्वन्द्वे न्यूजीलैंड-दलस्य दक्षिणाफ्रीका-दलस्य च प्रचलति सङ्घट्ट: ।

-----------------------------------

प्रधानमन्त्री आभासीयमुपवेशनम्

प्रधानमन्त्री श्रीनरेन्द्रमोदी प्रावोचत् यत् प्रशासनेन निवेशे आधारिक-संरचनार्थम् उद्योगार्थं च यावती प्राथमिकता प्रदत्ता अस्ति, तावती एव प्राथमिकता प्रजाभ्य:, अर्थव्यवस्थायै नवाचारेभ्यश्चापि अस्ति प्रदत्ता। अद्य वीडियो कॉन्फ्रेंसिंग इति दृश्यश्रव्य-माध्यमेन आजीविका विषयमवलम्ब्य वित्त-सङ्कल्पनाया: पश्चात् वेबिनार इति आभासीयमुपवेशनं सम्बोधयन् , श्रीमोदी न्यगादीत् यत् जनेषु निवेशस्य दृष्टिकोण: त्रिषु स्तम्भेषु, शिक्षायां, कौशलेषु, स्वास्थ्यसेवासु च आधारित: अस्ति।

[एस/बी-पीएम मोदी स्टेकहोल्डर पर-35 सेकंड]

अमुना प्रोक्तं यत् अद्य जना: विलोकितुम् अर्हन्ति यत् कथङ्कारं भारतस्य शिक्षाप्रणाली भूरि दशकानाम् अनन्तरं बृहत्परिवर्तनं सम्मुखीकुरुते। श्रीमोदिना प्रतिपादितं यत् वेबिनार इति आभासीयोपवेशनस्य विषय: "जनेषु, अर्थव्यवस्थायां नवाचारेषु च निवेश:" इति विकसित-भारतस्य दिङ्निर्देशान् निर्धारयति।

अग्रे अनेन भणितं यत् ऐषमो वित्तसङ्कल्पनायां दैशिक-पर्यटनस्य, अन्ताराष्ट्रिय-पर्यटनस्य च वर्धापनार्थं नैके निर्णया: स्वीकृताः सन्ति।

श्रीमोदी प्रत्यपादयत् यत् भारतम् ए.आई. क्षमतानां विकासार्थं राष्ट्रिय-बृहद्-भाषा-प्रतिदर्शं स्थापयिष्यति। असौ एतदपि अभाणीत् यत् अस्यां दिशि प्रशासनेतर-क्षेत्रमपि अग्रे आगच्छेत् इति आवश्यकम् अस्ति। प्रधानमन्त्री प्रावोचत् यत् विश्वमेकं विश्वसनीयं, सुरक्षितं, लोकतान्त्रिकं च राष्ट्रं प्रतीक्षते। यच्च ए.आई. क्षेत्रे आर्थिक-समाधानस्य विरचनं कर्तुं प्रभवेत्। एषः अवोचत् यत् सर्वकारेण स्टार्टअप प्रकल्पानां वर्धनार्थमेतास्यां वित्त-सङ्कल्पनायां नैके पदक्षेपा: सन्ति उत्थापिता:।

आजीविकोत्पादनं सर्वकारस्य प्रमुख-क्षेत्रेषु एकतमं क्षेत्रं वर्तते । प्रधानमन्त्रिण: दृष्टिकोण-त: प्रेरितो भूत्वा, सर्वकारेण जीविका-वर्धनं समेधितुं, आजीविकाया: समधिकान्

अवसरान् उत्पादयितुं नैके पदक्षेपा: उत्थापिता: सन्ति। अस्य विचार-विमर्शस्य उद्देश्य: चिरस्थायि-समावेशितापूर्ण-विकासेन साकं, प्रौद्योगिक्याम् अन्यक्षेत्रेषु च नेतृत्व-विधान-पूर्वकं सप्तचत्वारिंशदुत्तर-द्वि-सहस्र-तम-वर्षं यावत् विकसित-भारतस्य लक्ष्यस्य साकारीकरणस्य दिशि कार्यकर्तुं: कुशलस्य स्वस्थ-कार्यबलस्य मार्गस्य प्रशस्तीकरणम् अस्ति।

-----------------------------------

<u>पञ्चायत-राज-राज्य-मन्त्री</u>

पञ्चायत-राज-राज्य-मन्त्री प्रो. एस. पी. सिंह बघेल:, स्वास्थ्य-परिवार-कल्याण-राज्य-मन्त्री अनुप्रिया पटेल-वर्या च अद्य मॉडल महिला-अनुकूल-पञ्चायत-प्रतिदर्श-ग्राम-कार्यक्रमस्य शुभारम्भं कृतवन्तौ।

एष उपक्रम: मन्त्रालयस्य ऐषम: अन्ताराष्ट्रिय-महिला-दिवस-समारोहस्य अङ्गत्वेन वर्तते। एतस्य उपक्रमस्य प्राथमिक: उद्देश्य: प्रत्येकस्मिन् जनपदे न्यूनान्-न्यूनं एकस्य आदर्श-महिला-अनुकूल-ग्राम-पंचायतस्य स्थापना वर्तते। एतद्धि लैंगिक-संवेदनशीलानां बालिका-अनुकूल-शासन-प्रथानां च कृते प्रकाश-स्तम्भत्वेन कार्यं करिष्यति। दिवस-व्याप्यस्मिन् कार्यक्रमे विभिन्न मंत्रालयानां, विभागानां, संयुक्त-राष्ट्र-जनसंख्या-कोष-सन्निभानां चान्ताराष्ट्रिय-संघटनानां प्रतिनिधय: प्रतिभागं कुर्वन्ति स्म ।

-----------------------------------

<u>नव-दिल्ली-रेलदुर्घटना</u>

नव-दिल्ली-रेल-स्थासने दुरापन्नाया: ससम्भ्रम-पलायन-दुर्घटनाया: पृष्ठभूमौ डी.आर.एम. इति दिल्ली-मंडल-रेल-प्रबन्धकं, अतिरिक्त-दिल्ली-मंडल-रेल-प्रबन्धकं, रेल-सुरक्षा-बलस्य सहायक-सुरक्षा-आयुक्तञ्च समेत्य पञ्च वरिष्ठाधिकारिण: स्थानान्तरिता: सन्ति।

ध्येयमस्ति यत् विगते मासे पञ्चदशे दिनाङ्के प्रयागराजं प्रति गम्यमानेषु रेल-यानेषु आरोहणार्थं यात्रिणां सम्मर्दाधिक्य-कारणेन दुरापन्न-घटनायां अष्टादश-तीर्थयात्रिण: प्राणै: वियुक्ता: आसन्। पञ्चदश जनाश्च व्रणिताः अवर्तन्त। आदेशस्य अनुसारेण पुष्पेश आर. त्रिपाठी दिल्ल्या: नूतन: दिल्ली-मंडल-रेल-प्रबन्धको भविष्यति। एतद्धि उत्तरीय-रेल-क्षेत्रस्य द्वितीय: खण्ड: अस्ति।

-----------------------------------

झारखण्ड-विस्फोट:

झारखण्डे पश्चिमीय-सिंहभूम-जनपदस्य जराइकेला आरक्षि-स्थात्रान्तर्गतं बालिबा-वन क्षेत्रे अद्य दुरापन्ने आई.ई.डी. विस्फोटे सी.आर.पी.एफ. इति बलस्य त्रयो भटा: गम्भीर-रूपेण व्रणीभूता: सन्ति। त्रयश्चापि भटा: सुरक्षिताः उपचाराधीनाश्च सन्ति। एस.पीति आरक्षि-अधीक्षकेण आशुतोष-शेखरेण घटनाया: पुष्टि-पुरस्सरं प्रतिपादितं यत् अद्य प्रातः-कालादेव सुरक्षा-बलम् अन्वेषणाभियानकार्ये निरतम् आसीत्। ध्येयम् अस्ति यत् त्रयश्चापि व्रणिताः भटा: उपचारार्थं विमानेन रांची-नगरं सन्नेष्यन्ते।

-----------------------------------

डॉनल्डट्रम्पः- प्रशुल्कम्

अमेरिकायाः राष्ट्रपतिः डोनाल्ड-ट्रम्पः स्वप्रशासनस्य व्यापारनीत्याः सुदृढ-दृष्टिकोणं प्रदर्शयन् अत्यधिकं टैरिफ इति प्रशुल्कं विरुध्य यूरोपीय-सङ्घस्य, चीनस्य, ब्राजीलस्य,भारतस्य, दक्षिण-कोरियाया: अन्येषां च देशानाम् आलोचनां कृत्वा अप्रैलमासस्य द्वितीय दिनाङ्कात् पारस्परिक-प्रशुल्कस्य कार्यान्वयनम् उद्घोषितवान् । कांग्रेस् इत्यस्य एकस्मिन् संयुक्तसत्रे स्वकीये उद्घाटन-भाषणे सः अकथयत् यत् एतैः राष्ट्रैः अस्मासु यादृशः प्रशुल्कः स्थाप्यते, तादृश एव अस्माभिः तेषु स्थाप्यते । ट्रम्पः अवोचत् यत् , अन्यैः देशैः दशकेभ्यः अमेरिकां विरुध्य प्रशुल्कम् उपयुज्यते , अधुना तान् देशान् विरुध्य प्रशुल्क-प्रयोगस्य समयः अमेरिकायाः अस्ति । सामान्यतः,

यूरोपीयसङ्घ-चीन-ब्राजील-भारत-मैक्सिको-कनाडा चेत्यादिभिः सह अन्यराष्ट्राणि अमेरिकायाः अत्यधिकं प्रशुल्कं आहरन्ति, यदनुचितम् अस्ति । असौ वस्तूनां स्वदेशे विनिर्माणस्य प्रतिबद्धतां समर्थयन् प्रोक्तवान् यत् अमेरिकायामेव वस्तूनाम् उत्पादनेन एव प्रशुल्के न्यूनताम् आनेतुम् शक्यते । सः स्पष्टीकृतवान् यत् वरिष्ठ-नागरिका: सामाजिक-सुरक्षायाः लाभेषु कीदृशमपि प्रशुल्कं न दास्यन्ति । सः वरिष्ठ-नागरिकान् आश्वासितवान् यत् ते प्रशासनेन प्रदत्तान् सामाजिक-सुरक्षा-लाभान् प्रशुल्क-रहितं उपभोक्तुं शक्नुवन्ति ।

------------------------------------

नीत्यायोग-पत्रप्रख्यापनम्

नीति आयोगेन अद्य एकं कार्य-नीतिकं पत्रं प्रख्यापितम्। क्वांटम-कंप्यूटिंग इत्यस्य तीव्र-गत्या विकासार्थं राष्ट्रिय-सुरक्षा-विषये एतस्य प्रभावम् आश्रित्य नव-दिल्ल्याम् आयोजिते एकस्मिन् कार्यक्रमे "नीति फ्रंटियर टेक हब" इत्यनेन 'डेटा सिक्योरिटी काउंसिल ऑफ इंडिया' इत्यनेन च सम्भूय देशस्य फ्रंटियर टेक नेशन मध्ये परिवर्तनस्य तीव्रीकरणस्योद्देश्येन एकं पत्रं प्रख्यापितम् अस्ति। पत्र-प्रख्यापनस्य समये नीत्यायोगस्य सी.ई.ओ. इति प्रमुख-कार्यकारि-अधिकारिणा बी.वी.आर. सुब्रह्मण्यम् वर्येण देशस्य समग्रां क्षमताम् उद्घाटयितुं सद्यस्तनीनानां प्रविधीनां सक्रिय-रूपेण अभि-स्वीकरणस्य आवश्यकता-विषये प्रकाश: प्रक्षिप्त:। अमुना प्रोक्तं यत् अनुसंधानस्य, नवाचारस्य, च वैश्विक-सहभागितायां कार्यनीतिको निवेश: प्राविधिक-प्रगते: विषये भारतस्य अग्रपङ्क्तौ वर्तनार्थं महत्वपूर्ण: भविष्यति।

------------------------------------

क्रिकेट्

लाहौरे चैंपियंस ट्रॉफीति क्रिकेट् स्पर्धा-शृङ्खलाया: प्रागुपान्त्यचक्रीये द्वितीये द्वन्द्वे न्यूजीलैंड-दलस्य दक्षिणाफ्रीका-दलस्य च सङ्घट्ट: प्रचलति । तत्र हि पणकं विजित्य न्यूजीलैंड-दलेन प्रथमं

क्रीडनं प्रचितम् अस्ति। अथ: च दक्षिणाफ्रीका-दलं क्षेत्ररक्षणे निरतम् अस्ति। वार्ता प्राप्तिं यावत् न्यूजीलैंड-दलेन........... क्रीडकानां हानौ...................धावनांका: अर्जिता: सन्ति। धेयम् अस्ति यत् अस्य द्वन्द्वस्य विजेतृदलं अंत्यचक्रे भारतेन सह खेलिस्यिति।

।। इति वार्ता:।।